# SAMAGRA SHIKSHA, KERALA

## SUMMATIVE ASSESSMENT - TERM I - 2025-26

First Language-Part I- Paper-I

## SANSKRIT

(For Academic and Oriental Sanskrit Schools)

**Class- VIII**

Time 1 ½ Hours **Total Score - 40**

निर्देशा: -

- 15 निमेषाः समाश्वासकालः ।
- प्रश्नान् निर्देशान् च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

## भागः - 1

**1. अधोदत्तेभ्यः गणेभ्यः विभिन्नार्थकं गणं चित्वा लिखत ।** **(1)**

क) कनकं - सुवर्णम् ।　　ख) शैवलिनी - नदी ।

ग) अवनिः - भूमिः ।　　घ) कोकिलः - मयूरः ।

**2. अधोदत्तपट्टिकां पठित्वा उचितरूपेण युक्तं गणं चित्वा लिखत ।** **(1)**

| | | |
|---|---|---|
| उक्त्वा | - | तुमुन्नन्तम् । |
| अनुगम्य | - | क्त्वान्तम् । |
| श्रोतुम् | - | ल्यबन्तम् । |

क) उक्त्वा – तुमुन्नन्तम्, अनुगम्य – क्त्वान्तम्, श्रोतुम् – ल्यबन्तम् ।

ख) उक्त्वा – ल्यबन्तम्, अनुगम्य – तुमुन्नन्तम्, श्रोतुम् – क्त्वान्तम् ।

ग) उक्त्वा – क्त्वान्तम्, अनुगम्य – ल्यबन्तम्, श्रोतुम् - तुमुन्नन्तम् ।

घ) उक्त्वा – क्त्वान्तम्, अनुगम्य – तुमुन्नन्तम्, श्रोतुम् – ल्यबन्तम् ।

**3. एतत् वाक्यद्वयं पठत । अधस्तात् उचितम् उत्तरं किमिति लिखत ।** **(1)**

१) प्रकृतिसंरक्षणम् अनिवार्यं न भवति ।

२) सस्यपरिपालनम् अस्माकं दायित्वं भवति ।

क) प्रथमं वाक्यम् उचितम् ।

ख) द्वितीयं वाक्यम् उचितम् ।

ग) उभयमपि उचितम् ।

घ) उभयमपि अनुचितम् ।

4. उदाहरणानुसारं वाक्यं परिवर्तयत। (1)

उदा - यमुना गीतं **गायति**। यमुना गीतम् **अगायत्**।

अनिला शीघ्रं **धावति**। ...अनिला....शीघ्रम् अधावत्

**भागः - 2**

**कविताभागं पठित्वा 5 -6 प्रश्नयोः उत्तरे लिखत।**

कर्षणभूमौ काञ्चनचेलां

वयते दीपपतिः।

सौरभवाहो माधवमाल्यं

धरणीं धारयति॥

**5. गणपतिः - गणानां पतिः। तादृशं समस्तपदं चित्वा विग्रहवाक्यं लिखत।** **(2)**

**6. 'पवनः भूमिं पुष्पालंकृतां करोति'। - इत्याशययुक्तां कवितापङ्क्तिं चित्वा लिखत।** **(2)**

**7. अधोदत्तं गद्यांशं पठित्वा संभाषणांशान् पूरयत।** **(2)**

अभिमुखावसरे गद्दिकाकलाकारं पि.के काऌन् महाशयं प्रति अवतारिका कांश्चन प्रश्नान् अपृच्छत् - "नमस्ते महाशय! गद्दिकाकलारूपं केरलेषु कुत्र प्रचाल्यते ?" तत् श्रुत्वा काऌन् महाशयः प्रत्यवदत् - "केरलेषु वयनाट्देशे एव मुख्यतया प्रचाल्यते।" अवतारिका पुनरपि अपृच्छत् - "कस्मिन् गोत्रविभागे प्रचलति ?" "अटियसमुदाये प्रचलति" इति काऌन् प्रत्यवदत्। अन्ते धन्यवादम् उक्त्वा अवतारिका व्यरमत्।

अवतारिका - नमस्ते महाशय !

काऌन् - नमस्ते !

अवतारिका - गद्दिकाकलारूपं केरलेषु कुत्र प्रचाल्यते ?

काऌन् - ..............................।

अवतारिका - कस्मिन् गोत्रविभागे प्रचलति ?

काऌन् - ....................।

अवतारिका - धन्यवादः।

काऌन् - स्वागतम्।

**8. यदा-तदा उपयुज्य वाक्यद्वयं योजयत।** **(2)**

**क)** रोगः जायते। आतुरालयं प्रविशति।

**9. उदाहरणानुसारं वाक्यपरिवर्तनं कुरुत ।** **(2)**

उदाः - रसिया - " वेदिकायां कलारूपं सम्यक् अवतारयतु ।"

वेदिकायां कलारूपं सम्यक् अवतारयतु इति रसिया अवदत् ।

**(क)** अध्यापकः - "सर्वे छात्राः संस्कृतोत्सवे भागं स्वीकुर्वन्तु ।"

.................................................................... ।

**10. (I) उदाहरणानुसारं मञ्जूषातः पदानि स्वीकृत्य उचितं वाक्यद्वयं रचयत ।** **(2)**

| | | | | |
|---|---|---|---|---|
| माता | सोदरः | साकं | आतुरालयं | गच्छति । |
| उमा | पुत्रः | | विद्यालयं | |
| रीना | मित्रम् | | उद्यानं | |

**उदाः** - माता सोदरेण साकम् आतुरालयं गच्छति ।

**क)** ............................................................ ।

**ख)** ............................................................ ।

**अथवा**

**(II) उदाहरणानुसारं वाक्यं परिवर्तयत ।**

**उदा** - जरीना कवितां पठति । (कर्तरि ) जरीनया कविता पठ्यते । (कर्मणि)

**(क)** सारा कवितां लिखति । (कर्तरि) .................................. (कर्मणि)

**11. उदाहरणानुसारं समानसन्धियुक्तं पदं खण्डिकातः स्वीकृत्य पदच्छेदं कुरुत ।** **(2)**

ग्रामस्यास्य मनोहारितां पश्यन्तु । सूर्योदये सर्वत्र कुसुमानि विकसन्ति । कृषकास्तु केदारेषु कर्मनिरताः भवन्ति । धेनवः तृणानि चरन्ति ।

**उदा** - पुस्तकस्यास्य - पुस्तकस्य + अस्य ।

**क)** ..................... - ..................+ ................ ।

**उदा** - मानवास्तु - मानवाः + तु ।

**ख)** ..................... - ..................+ ................ ।

**12. संख्यां संस्कृतभाषया लिखत ।** **(3)**

**क)** 32 - ...............................................

**ख)** 121 - ...............................................

**ग)** 235 - ...............................................

13. पट्टिकाम् उचितरीत्या पूरयत। (3)

| | | |
|---|---|---|
| अहं पठामि। | आवां पठावः। | वयं ............ । |
| अहं धावामि। | आवां ..........। | वयं धावामः। |
| अहं ............ । | आवां लिखावः। | वयं लिखामः। |

14. प्रादेशिकभाषया विवर्तयत। (4)

अस्मान् परितः विद्यमाना स्थितिः परिस्थितिः। पञ्चभूतात्मिका भवति प्रकृतिः। भूमिः, जलं, वायुः, अग्निः, आकाशम् चैतानि भवन्ति पञ्चभूतानि। तेषां संरक्षणेन प्रकृतिसंरक्षणं साध्यं भवति। प्रकृतिसंरक्षणविषये वयं सर्वे सर्वदा श्रद्धालवः भवामः।

15. (I) 'ग्रामकन्यका' नाम कवितायाः आशयं स्ववाक्यैः लिखत। (4)

**श्रद्धेयाः अंशाः -** सूर्यः - नदी - मेघाः - कर्षकः - केदाराः।

**अथवा**

**(II) कविताभागं पठित्वा अधोदत्तप्रश्नानाम् उत्तराणि लिखत।**

पूर्वस्यां दिशि पर्वतराजः
कनकं तापयति।
कोकिलपोतो मङ्गलगानं
मधुरं श्रावयति॥

**क**) कः कनकं तापयति?

**ख**) श्लोकात् एकं णिजन्तक्रियापदं चित्वा लिखत।

**ग**) श्लोके सुवर्णम् इत्यर्थकं पदं किम्?

**घ**) कोकिलपोतः गानं कीदृशं श्रावयति?

16. (I) "भूस्खलनं सञ्जातम् - सर्वे भीताः" इति शीर्षकेण वार्तां रचयत। (4)

**श्रद्धेयाः अंशाः -**

**स्थानम्** - वयनाड् मुण्डक्कै।

**समयः** - गुरुवासरः, रात्रौ।

**कारणम्** - पारिस्थितिकदूषणम्।

**विशेषः** - संयोजितरक्षाप्रवर्तनम्।

**अथवा**

(II) भवद्भिः कृतामेकां पठनयात्राम् अधिकृत्य दैनिकीं लिखत।

श्रद्धेयाः अंशाः - दिनाङ्कः - स्थानम् - समयः - अनुभवः।

17. (I) कथास्तम्भं क्रमीकुरुत। (4)

- सः स्वयं सुन्दरं मन्यमानः इतरान् परिहसति स्म।
- भग्नं नीडं दृष्ट्वा मयूरः रुरोद।
- वने गर्विष्ठः कश्चित् मयूरः आसीत्।
- वृक्षशाखा पतित्वा मयूरस्य नीडं विशीर्णमभवत्।

अथवा

(II) क्रियापदानि उपयुज्य नूतनवाक्यानि रचयत।

क) नृत्यति - ............................................................ ।

ख) पठति - ............................................................ ।

ग) लिखति - ............................................................ ।

घ) क्रीडति - ............................................................ ।

** ** **